# Shri Rangaraja Suprabhatam

# શ્રીરઙ્ગરાજસુપ્રભાતમ્

## Document Information

Text title : Rangaraja Suprabhatam

File name : rangarAjasuprabhAtam.itx

Category : vishhnu, suprabhAta, aShTaka

Location : doc_vishhnu

Proofread by : Aruna Narayanan

Latest update : March 26, 2024

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2024

*sanskritdocuments.org*

# શ્રીરઙ્ગરાજસુપ્રભાતમ્

॥ શ્રીઃ ॥

શ્રીરઙ્ગભૂમિતલભૂસુરદેશિકેન્દ્રૈઃ
શ્રીરઙ્ગવાટમિદમિત્યુદિતૈઃ પ્રબોધૈઃ ।
શ્રીભૂમિપાણિકમલૈશ્ચ સમાશ્રિતાઙ્ઘ્રે
શ્રીરઙ્ગરાજ જગદીશ્વર સુપ્રભાતમ્ ॥ ૧॥

કસ્તૂરિકાકલિકયા કલિતાલકસ્ય
કન્દર્પકોટિસદૃશસ્ય કૃપામ્બુરાશેઃ ।
કલ્યાણભૂમિધર કાઙ્ક્ષિતધૈર્યસિન્ધો
શ્રીરઙ્ગરાજ જગદીશ્વર સુપ્રભાતમ્ ॥ ૨॥

લીલાવિશેષલલિતાલલિતેન્દિરાયાઃ
માલાકવેરતનયા મણિરેવ સાક્ષાત્ ।
શ્રીરઙ્ગરાડિતિ જના નિગદન્તિ સર્વે
શ્રીરઙ્ગરાજ જગદીશ્વર સુપ્રભાતમ્ ॥ ૩॥

જમ્બૂદ્રુમાદિવસતેઃ શશિરાજમૌલેઃ
સમ્ભૂતનિર્ઝરનદીહતકલ્મષસ્ય ।
ઉદ્દીપનં વિતનુતે તવ પાદસેવા
શ્રીરઙ્ગરાજ વિજયિન્ તવ સુપ્રભાતમ્ ॥ ૪॥

શ્રીરઙ્ગરાજભવને ભુવનૈકમાન્યે
સીતાકરામ્બુરુહસેવ્યતયાતિધન્યે ।
યાને વિમાનશયને વરવેદશૃઙ્ગે
શ્રીરઙ્ગરાજ જગદીશ્વર સુપ્રભાતમ્ ॥ ૫॥

શ્રી ચન્દ્રપુષ્કરિણિકાસરસઃપ્રતીરે
શ્રીવૃક્ષમૂલ કમલાક્ષ કટાક્ષપૂરે ।

શ્રીસહ્યજાવરવિભૂષણ દિવ્યમૂર્તે
શ્રીરઙ્ગરાજ જગદીશ્વર સુપ્રભાતમ્ ॥ ૬॥

સૂર્યેન્દુમણ્ડલમૃગેન્દ્ર સુપર્ણશેષ-
વાલાભિવર્યગજવાજિરથપ્રધાનૈઃ ।
દિવ્યૈર્વિમાનશયને દયયાત્તનાથ
શ્રીરઙ્ગરાજ જગદીશ્વર સુપ્રભાતમ્ ॥ ૭॥

લક્ષ્મીશ કેશવ હરે નૃહરે મુરારે
શૌરે રમારમણ કારણ દીનબન્ધો ।
ઇત્યાદરેણ વદતામિહ વાઞ્છિતાર્થ
શ્રીરઙ્ગરાજ જગદીશ્વર સુપ્રભાતમ્ ॥ ૮॥

શ્રીસુપ્રભાતવિનુતં સુકૃતાભિધેયં
પ્રાતસ્સમાહિતમતિર્ય ઇદં પઠેત્તુ ।
તસ્મૈ ભુજઙ્ગશયનો ભુવિ રઙ્ગનાથઃ
સર્વાણિ વાઞ્છિતફલાનિ સદા પ્રસૂતે ॥ ૯॥

ઇતિ શ્રીરઙ્ગરાજસુપ્રભાતં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Rangaraja Suprabhatam*

pdf was typeset on April 12, 2024

Please send corrections to *sanskrit@cheerful.com*